॥श्रीहरिः॥

LEARN GEETA
तस्मात् योगी भवार्जुन

Ver 7.0
सप्तम संस्करण

गीता परिवार
॥ गीता पढ़ें, पढ़ायें, जीवन में लायें ॥

**गीता परिवार द्वारा श्रीमद्भगवद्गीता का शुद्ध उच्चारण सीखने हेतु अनुस्वार, विसर्ग एवं आघात प्रयोग सहित, चरणानुसार विभाग, मूल संहिता पाठ के अनुकूल**

# श्रीमद्भगवद्गीता

# प्रथम (1वाँ) अध्याय



# अर्जुनविषादयोग

- लर्नगीता एप्प : app.learngeeta.com
- नया पंजीकरण : Joingeeta.com
- अभ्यास सामग्री : practice.learngeeta.com
- विवेचन सुनें : vivechan.learngeeta.com
- परीक्षा पंजीकरण : exam.learngeeta.com
- YouTube : youtube.com/c/GeetaPariwar
- Instagram : instagram.com/geetaparivar
- साधक पोर्टल : online.learngeeta.com
- पुस्तक क्रय : store.learngeeta.com
- प्रचार सामग्री : learngeeta.com/pracharak
- गीतासेवी बनें : sewa.learngeeta.com
- गीता कक्षा उपहार : gift.learngeeta.com
- Facebook : facebook.com/geetaparivar
- Twitter : x.com/Learn_Geeta

**वसुदेवसुतं(न्) देवं(ङ्), कंसचाणूरमर्दनम्।**
**देवकीपरमानन्दं(ङ्), कृष्णं(वँ) वन्दे जगद्गुरुम्॥**

ॐ

श्रीपरमात्मने नमः

श्रीमद्भगवद्गीता

## अथ प्रथमोऽध्यायः

धृतराष्ट्र उवाच

**धर्मक्षेत्रे कुरुक्षेत्रे, समवेता युयुत्सवः।**
**मामकाः(फ्) पाण्डवाश्चैव, किमकुर्वत सञ्जय॥1॥**

सञ्जय उवाच

**दृष्ट्वा तु पाण्डवानीकं(व्ँ), व्यूढं(न्) दुर्योधनस्तदा।**
**आचार्यमुपसङ्गम्य, राजा वचनमब्रवीत्॥2॥**

**पश्यैतां(म्) पाण्डुपुत्राणाम्, आचार्य महतीं(ञ्) चमूम्।**
**व्यूढां(न्) द्रुपदपुत्रेण, तव शिष्येण धीमता॥3॥**

**अत्र शूरा महेष्वासा, भीमार्जुनसमा युधि।**
**युयुधानो विराटश्च, द्रुपदश्च महारथः॥4॥**

**धृष्टकेतुश्चेकितानः(ख्), काशिराजश्च वीर्यवान्।**
**पुरुजित्कुन्तिभोजश्च, शैब्यश्च नरपुङ्गवः॥5॥**

**युधामन्युश्च विक्रान्त, उत्तमौजाश्च वीर्यवान्।**
**सौभद्रो द्रौपदेयाश्च, सर्व एव महारथाः॥6॥**

**अस्माकं(न्) तु विशिष्टा ये, तान्निबोध द्विजोत्तम।**
**नायका मम सैन्यस्य, सञ्ज्ञार्थं(न्) तान्ब्रवीमि ते॥7॥**

**भवान्भीष्मश्च कर्णश्च, कृपश्च समितिञ्जयः।**
**अश्वत्थामा विकर्णश्च, सौमदत्तिस्तथैव च॥8॥**

Learngeeta.com

अन्ये च बहवः(श्) शूरा, मदर्थे त्यक्तजीविताः।
नानाशस्त्रप्रहरणाः(स्), सर्वे युद्धविशारदाः॥9॥

अपर्याप्तं(न्) तदस्माकं(म्), बलं(म्) भीष्माभिरक्षितम्।
पर्याप्तं(न्) त्विदमेतेषां(म्), बलं(म्) भीमाभिरक्षितम्॥10॥

अयनेषु च सर्वेषु, यथाभागमवस्थिताः।
भीष्ममेवाभिरक्षन्तु, भवन्तः(स्) सर्व एव हि॥11॥

तस्य सञ्जनयन्हर्षं(ङ्), कुरुवृद्धः(फ्) पितामहः।
सिंहनादं(वँ) विनद्योच्चैः(श्), शङ्खं(न्) दध्मौ प्रतापवान्॥12॥

ततः(श्) शङ्खाश्च भेर्यश्च, पणवानकगोमुखाः।
सहसैवाभ्यहन्यन्त, स शब्दस्तुमुलोऽभवत्॥13॥

ततः(श्) श्वेतैर्हयैर्युक्ते, महति स्यन्दने स्थितौ।
माधवः(फ्) पाण्डवश्चैव, दिव्यौ शङ्खौ प्रदध्मतुः॥14॥

पाञ्चजन्यं(म्) हृषीकेशो, देवदत्तं(न्) धनञ्जयः।
पौण्ड्रं(न्) दध्मौ महाशङ्खं(म्), भीमकर्मा वृकोदरः॥15॥

अनन्तविजयं(म्) राजा, कुन्तीपुत्रो युधिष्ठिरः।
नकुलः(स्) सहदेवश्च, सुघोषमणिपुष्पकौ॥16॥

काश्यश्च परमेष्वासः(श्), शिखण्डी च महारथः।
धृष्टद्युम्नो विराटश्च, सात्यकिश्चापराजितः॥17॥

द्रुपदो द्रौपदेयाश्च, सर्वशः(फ्) पृथिवीपते।
सौभद्रश्च महाबाहुः(श्), शङ्खान्दध्मुः(फ्) पृथक्पृथक्॥18॥

स घोषो धार्तराष्ट्राणां(म्), हृदयानि व्यदारयत्।
नभश्च पृथिवीं(ञ्) चैव, तुमुलो व्यनुनादयन्॥19॥

Learngeeta.com

LEARN GEETA
तस्मात् योगी भवार्जुन

अथ व्यवस्थितान्दृष्ट्वा, धार्तराष्ट्रान्कपिध्वजः।
प्रवृत्ते शस्त्रसम्पाते, धनुरुद्यम्य पाण्डवः॥20॥

हृषीकेशं(न्) तदा वाक्यम्, इदमाह महीपते।

अर्जुन उवाच

सेनयोरुभयोर्मध्ये, रथं(म्) स्थापय मेऽच्युत॥21॥

यावदेतान्निरीक्षेऽहं(यँ), योद्धुकामानवस्थितान्।
कैर्मया सह योद्धव्यम्, अस्मिन्रणसमुद्यमे॥22॥

योत्स्यमानानवेक्षेऽहं(यँ), य एतेऽत्र समागताः।
धार्तराष्ट्रस्य दुर्बुद्धेः(र्), युद्धे प्रियचिकीर्षवः॥23॥

सञ्जय उवाच

एवमुक्तो हृषीकेशो, गुडाकेशेन भारत।
सेनयोरुभयोर्मध्ये, स्थापयित्वा रथोत्तमम्॥24॥

भीष्मद्रोणप्रमुखतः(स्), सर्वेषां(ञ्) च महीक्षिताम्।
उवाच पार्थ पश्यैतान्, समवेतान्कुरूनिति॥25॥

तत्रापश्यत्स्थितान्पार्थः(फ्), पितृनथ पितामहान्।
आचार्यान्मातुलान्भ्रातृन्, पुत्रान्पौत्रान्सखींस्तथा॥26॥

श्वशुरान्सुहृदश्चैव, सेनयोरुभयोरपि।
तान्समीक्ष्य स कौन्तेयः(स्), सर्वान्बन्धूनवस्थितान्॥27॥

कृपया परयाविष्टो, विषीदन्निदमब्रवीत्।

अर्जुन उवाच

दृष्ट्वेमं(म्) स्वजनं(ङ्) कृष्ण, युयुत्सुं(म्) समुपस्थितम्॥28॥

Learngeeta.com

LEARN GEETA

सीदन्ति मम गात्राणि, मुखं(ञ्) च परिशुष्यति।
वेपथुश्च शरीरे मे, रोमहर्षश्च जायते॥29॥

गाण्डीवं(म्) स्रंसते हस्तात्, त्वक्चैव परिदह्यते।
न च शक्नोम्यवस्थातुं(म्), भ्रमतीव च मे मनः॥30॥

निमित्तानि च पश्यामि, विपरीतानि केशव।
न च श्रेयोऽनुपश्यामि, हत्वा स्वजनमाहवे॥31॥

न काङ्क्षे विजयं(ङ्) कृष्ण, न च राज्यं(म्) सुखानि च।
किं(न्) नो राज्येन गोविन्द, किं(म्) भोगैर्जीवितेन वा॥32॥

येषामर्थे काङ्क्षितं(न्) नो, राज्यं(म्) भोगाः(स्) सुखानि च।
त इमेऽवस्थिता युद्धे, प्राणांस्त्यक्त्वा धनानि च॥33॥

आचार्याः(फ्) पितरः(फ्) पुत्राः(स्), तथैव च पितामहाः।
मातुलाः(श्) श्वशुराः(फ्) पौत्राः(श्), श्यालाः(स्) सम्बन्धिनस्तथा॥34॥

एतान्न हन्तुमिच्छामि, घ्नतोऽपि मधुसूदन।
अपि त्रैलोक्यराज्यस्य, हेतोः(ख्) किं(न्) नु महीकृते॥35॥

निहत्य धार्तराष्ट्रान्नः(ख्), का प्रीतिः(स्) स्याज्जनार्दन।
पापमेवाश्रयेदस्मान्, हत्वैतानाततायिनः॥36॥

तस्मान्नार्हा वयं(म्) हन्तुं(न्), धार्तराष्ट्रान्स्वबान्धवान्।
स्वजनं(म्) हि कथं(म्) हत्वा, सुखिनः(स्) स्याम माधव॥37॥

यद्यप्येते न पश्यन्ति, लोभोपहतचेतसः।
कुलक्षयकृतं(न्) दोषं(म्), मित्रद्रोहे च पातकम्॥38॥

कथं(न्) न ज्ञेयमस्माभिः(फ्), पापादस्मान्निवर्तितुम्।
कुलक्षयकृतं(न्) दोषं(म्), प्रपश्यद्भिर्जनार्दन॥39॥

Learngeeta.com

LEARN GEETA तस्मात् योगी भवार्जुन

कुलक्षये प्रणश्यन्ति, कुलधर्माः(स्) सनातनाः।
धर्मे नष्टे कुलं(ङ्) कृत्स्नम्, अधर्मोऽभिभवत्युत॥40॥

अधर्माभिभवात्कृष्ण, प्रदुष्यन्ति कुलस्त्रियः।
स्त्रीषु दुष्टासु वार्ष्णेय, जायते वर्णसङ्करः॥41॥

सङ्करो नरकायैव, कुलघ्नानां(ङ्) कुलस्य च।
पतन्ति पितरो ह्येषां(लुँ), लुप्तपिण्डोदकक्रियाः॥42॥

दोषैरेतैः(ख्) कुलघ्नानां(वँ), वर्णसङ्करकारकैः।
उत्साद्यन्ते जातिधर्माः(ख्), कुलधर्माश्च शाश्वताः॥43॥

उत्सन्नकुलधर्माणां(म्), मनुष्याणां(ञ्) जनार्दन।
नरकेऽनियतं(वँ) वासो, भवतीत्यनुशुश्रुम॥44॥

अहो बत महत्पापं(ङ्), कर्तुं(वँ) व्यवसिता वयम्।
यद्राज्यसुखलोभेन, हन्तुं(म्) स्वजनमुद्यताः॥45॥

यदि मामप्रतीकारम्, अशस्त्रं(म्) शस्त्रपाणयः।
धार्तराष्ट्रा रणे हन्युः(स्), तन्मे क्षेमतरं(म्) भवेत्॥46॥

सञ्जय उवाच

एवमुक्त्वार्जुनः(स्) सङ्ख्ये, रथोपस्थ उपाविशत्।
विसृज्य सशरं(ञ्) चापं(म्), शोकसंविग्नमानसः॥47॥

ॐ तत्सदिति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां(यँ) योगशास्त्रे
श्रीकृष्णार्जुनसंवादे अर्जुनविषादयोगो नाम प्रथमोऽध्यायः॥

॥ॐ श्रीकृष्णार्पणमस्तु॥

Learngeeta.com
LEARNGEETA

Ver 7.0
सप्तम संस्करण

# स्तर 3 उच्चारण नियमावली

- **विशिष्ट स्वर और उनकी मात्राएँ** - ह्रस्व **ऋ** = ृ - क्+ऋ = **कृ**, दीर्घ **ॠ** = ॄ - क्+ॠ = **कॄ**
- **अल्पप्राण व्यञ्जन** - जिन व्यञ्जनों के उच्चारण में श्वास-वायु कम मात्रा में बाहर निकलती है
  क्,ग्,ङ्,च्,ज्,ञ्,ट्,ड्,ण्,त्,द्,न्,प्,ब्,म्,य्,र,ल्,व्
- **महाप्राण व्यञ्जन** - ऐसे व्यञ्जन जिनको बोलने में अधिक प्रयत्न करना पड़ता है और बोलते समय मुख से अधिक वायु निकलती है। ख्, घ्, छ्, झ्, ठ्, ढ्, थ्, ध्, फ्, भ्, श्, ष्, स्, ह्
- **आदेश** - किसी वर्ण को हटाकर जब कोई दूसरा वर्ण शत्रु की भांति उसके स्थान पर आ बैठता है। (शत्रुवदादेश:)
- **आगम** - किसी वर्ण के साथ जब दूसरा वर्ण मित्र की भांति पास आकर बैठकर उससे संयुक्त हो जाता है। (मित्रवदागम:)
- **स्वर या अच् सन्धि** दो स्वरों के मेल से स्वर में परिवर्तन होने के कारण इन्हें स्वर-सन्धि कहते हैं।

**1. दीर्घ सन्धि – अक: सवर्णे दीर्घ: -** दोनों स्वरों के स्थान पर एक आदेश

अ/आ + अ/आ = **आ** (भय्+अ+अभये= भयाभये) इ/ई + इ/ई = **ई** (भ्रमत्+इ+इव = भ्रमतीव)

उ/ऊ + उ/ऊ = **ऊ** (तेष्+उ+उपजायते = तेषूपजायते) ऋ/ॠ + ऋ/ॠ = **ॠ** (पित्+ऋ+ऋणम् = पितॄणम्)

**2. गुण सन्धि – आद्गुण: -** दोनों स्वरों के स्थान पर एक आदेश

अ/आ + इ/ई = **ए** (विगत्+अ+इच्छा = विगतेच्छा) अ/आ + उ/ऊ = **ओ** (पुर्+आ+उवाच = पुरोवाच)

अ/आ + ऋ/ॠ = **अर्** (मह्+आ+ऋषीणाम् = महर्षीणाम्) अ/आ + ऌ = **अल्** (तव्+अ+ऌकार: = तवल्कार:)

**3. यण् सन्धि – इको यणचि -** प्रथम वर्ण के स्थान पर आदेश

इ/ई + अन्य कोई भी स्वर = **य्** (कर्मण्+इ+एव = कर्मण्येव) उ/ऊ + अन्य कोई भी स्वर= **व्** (त्+उ+एवाहम् = त्वेवाहम्)

ऋ/ॠ + अन्य कोई भी स्वर= **र्** (जाग्+ऋ+अति = जाग्रति) ऌ + अन्य कोई भी स्वर = **ल्** (ऌ+आकृति: = लाकृति:)

**4. वृद्धि सन्धि – वृद्धिरेचि -** दोनों स्वरों के स्थान पर एक आदेश

अ/आ + ए/ऐ = **ऐ** (सहस्+आ+एव = सहसैव) अ/आ +ओ/औ = **औ** (च् +अ+ओषधी: = चौषधी:)

**5. अयादि सन्धि – एचोऽयवायाव:-** प्रथम वर्ण के स्थान पर आदेश

ए + कोई भी स्वर = **अय्** (राजर्ष्+ए+अ: = राजर्षय:) ऐ + कोई भी स्वर = **आय्** (न्+ऐ+अका: = नायका:)

ओ + कोई भी स्वर= **अव्** (मन्+ओ+ए = मनवे) औ + कोई भी स्वर= **आव्** (द् व्+औ+ इमौ =द्वाविमौ)

**6. पूर्वरूप सन्धि – एङ: पदान्तादति -** दोनों स्वरों के स्थान पर एक आदेश

पदान्त ए + अ = **एऽ** (त्+ए+अभिहिता = तेऽभिहिता) पदान्त ओ + अ =**ओऽ** (दृष्ट्+ओ+अन्त: = दृष्टोऽन्त: )

Learngeeta.com



**योगेशं(म्) सच्चिदानन्दं(वँ), वासुदेवं(वँ) व्रजप्रियम्।**
**धर्मसंस्थापकं(वँ) वीरं(ङ्), कृष्णं(वँ) वन्दे जगद्गुरुम्॥**

© GEETA PARIWAR
गीता परिवार के साहित्य को किसी भी प्रकार से अन्य संस्था अथवा अन्य स्थान पर उपयोग/प्रकाशित करने से पूर्व अनुमति लेना आवश्यक है। अनुमति लेने हेतु पूर्ण प्रयोजन के साथ हमें consent@learngeeta.com पर ईमेल करें।